# shrIhanumadaShTottarashatanAmastotram 7

# શ્રીહનુમદષ્ટોત્તરશતનામસ્તોત્રમ્ ૭

## Document Information

Text title : Hanumat Ashtottarashatanama Stotram 7

File name : hanumadaShTottarashatanAmastotram7.itx

Category : hanumaana, aShTottarashatanAma, stotra

Location : doc_hanumaana

Transliterated by : Gopal Upadhyay gopal.j.upadhyay at gmail.com

Proofread by : Gopal Upadhyay, PSA Easwaran

Description-comments : See corresponding nAmAvalI

Source : ParAsharasamhita Hanumachcharitra Vol 2 pages 43-49

Latest update : July 8, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 24, 2024

*sanskritdocuments.org*

# શ્રીહનુમદષ્ટોત્તરશતનામસ્તોત્રમ્ ૭

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીસીતરામચન્દ્રાભ્યાં નમઃ ॥

શ્રીપરાશર ઉવાચ -
સ્તોત્રાન્તરં પ્રવક્ષ્યામિ હનુમત્પ્રતિપાદકમ્ ।
શ઼ૃણુ મૈત્રેય વિપ્રેન્દ્ર અષ્ટોત્તરશતાધિકમ્ ॥

અગસ્ત્યેન પુરા પ્રોક્તં સુતીક્ષ્ણાય મહાત્મને ।
સર્વપાપક્ષયકરં સદા વિજયવર્ધનમ્ ॥

સુતીક્ષ્ણ ઉવાચઃ -
ભગવન્ કેન મન્ત્રેણ સ્તુત્વા તં ભુવિ માનવઃ ।
અયત્નેનૈવ લભતે સહસા સર્વસમ્પદઃ ॥

ભૂતપ્રેતપિશાચાદિ પૂતનાબ્રહ્મરાક્ષસાઃ ।
કૂષ્માણ્ડકિન્નરાધીશરક્ષો યક્ષખગાદિના ॥

નિધનં ચૈવ દૈત્યાનાં દાનવાનાં વિશેષતઃ ।
અપસ્મારગ્રહાણાં ચ સ્ત્રીગ્રહાણાં તથૈવ ચ ॥

મહામૃત્યુગ્રહાણાં ચ નીચચોરગ્રહાત્મનામ્ ।
અન્યેષાં ચાતિઘોરાણાં સર્પાણાં ક્રૂરકર્મણામ્ ॥

વાતપિત્તકફાદિનાં જ્વરાણામતિરોગિણામ્ ।
શિરો નેત્રમુખાસ્યાન્ઘ્રિગુદઘ્રાણોદરીભવામ્ ॥

તથૈવ રાજયક્ષ્માણાં શાન્તિઃ કેન પ્રદૃશ્યતે ।
ચોરાદિ રાજશસ્ત્રાદિ વિષદુસ્સ્વપ્નભીતીષુ ॥

સિંહવ્યાઘ્રવરાહાદિષ્વન્યાસ્વાપત્સુ ભીતિષુ ।
કિં જપ્યં મહાભાગ બ્રૂહિ શિષ્યસ્ય મે મુને ॥

શ્રીઅગસ્ત્ય ઉવાચ -
સુહૃદો મમ ભક્તસ્ય તવ રક્ષાકરં વરમ્ ।
પ્રવક્ષ્યામિ શ્ṛણુષ્વૈકં સુતીક્ષ્ણ સુસમાહિતઃ ॥

ઉપેન્દ્રેણ પુરેન્દ્રાય પ્રોક્તં નારાયણાત્મના ।
ત્રૈલોક્યૈશ્વર્યસિદ્ધ્યર્થમભાવાય ચ ચિદ્વિષામ્ ॥

સભાયાં નારદાદીનાં ઋષિણાં પુણ્યકર્મણામ્ ।
ઉપવિશ્ય મયા તત્ર શ્ṛતં તસ્ય પ્રસાદતઃ ॥

અષ્ટોત્તરશતં નામ્ના મતિગુહ્યં હનુમતઃ ।
નોક્તપૂર્વમિદં બ્રહ્મન્ રહસ્યં યસ્યકસ્યચિત્ ॥

ૐ અસ્ય શ્રીહનુમદષ્ટોત્તરશતદિવ્યનામસ્તોત્રમન્ત્રસ્ય
અગસ્ત્યો ભગવાન્ ઋષિઃ । અનુષ્ટુપ્છન્દઃ । શ્રીહનુમાન્ દેવતા ।
મારુતાત્મજ ઇતિ બીજમ્ । અઞ્જનાસૂનુરિતિ શક્તિઃ ।
વાયુપુત્રેતિ કીલકમ્ ।
મમ શ્રીહનુમત્પ્રસાદસિદ્ધ્યર્થે જપે વિનિયોગઃ ॥

ૐ નમો ભગવતે આઞ્જનેયાય અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ નમો ભગવતે વાયુપુત્રાય તર્જનીભ્યાં નમઃ ।
ૐ નમો ભગવતે કેસરિપ્રિયનન્દનાય મધ્યમાભ્યાં નમઃ ।
ૐ નમો ભગવતે રામદૂતાય અનામિકાભ્યાં નમઃ ।
ૐ નમો ભગવતે લક્ષ્મણપ્રાણદાત્રે કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ નમો ભગવતે શ્રીહનુમતે કરતલકરપૃષ્ઠાભ્યાં નમઃ ।
ઇતિ કરન્યાસઃ ॥

ૐ નમો ભગવતે આઞ્જનેયાય હૃદયાય નમઃ ।
ૐ નમો ભગવતે વાયુપુત્રાય શિરસે સ્વાહા ।
ૐ નમો ભગવતે કેસરિપ્રિયનન્દનાય શિખાયૈ વષટ્ ।
ૐ નમો ભગવતે રામદૂતાય કવચાય હુમ્ ।
ૐ નમો ભગવતે લક્ષ્મણપ્રાણદાત્રે નેત્રત્રયાય વૌષટ્ ।
ૐ નમો ભગવતે શ્રીહનુમતે અસ્ત્રાય ફટ્ ।
ઇતિ હૃદયાદિ ષડઙ્ગન્યાસઃ ॥

ભૂર્ભૂવસ્વરોમિતિ દિગ્બન્ધઃ ॥

॥ અથ ધ્યાનમ્ ॥

પમ્પાતટવનોદ્દેશે પરમર્ષિનિષેવિતે ।
પરિતસ્સિદ્ધગન્ધર્વકિન્નરોરગસેવિતે ॥

નિર્વૈરમૃગસિંહાદિ નાનાસત્વનિષેવિતે ।
મધુરે મધુરાલાપે મનોજ્ઞતલકન્દરે ॥

મતઙ્ગપર્વતપ્રાન્તમાનસાદિમનોહરે ।
મહાસિંહગુહાગેહે ઉપરઞ્જિતપશ્ચિમે ॥

અતીન્દ્રિયમનોભારૈઃ અતિમન્મથકાનનૈઃ ।
શમાદિ ગુણસમ્પન્નૈઃ અતીતષડરાતિભિઃ ॥

નિખિલાગમતત્વજ્ઞૈઃ મુનિભિર્મુદિતાત્મભિઃ ।
ઉપાસ્યમાનવદ્ભાજન મણિપીઠ ઉપસ્થિતમ્ ॥

નલનીલમુખૈશ્ચાપિ વાનરૈન્દ્રૈરુપાસિતમ્ ।
સમુદઞ્ચિતવાલાગ્રં સમગ્રમણિભૂષણમ્ ॥

શમાન્તકમહોરસ્કસમાહિતભુજદ્વયમ્ ।
પરાર્થ્યં પદ્મરાગાદિ સ્ફુરન્મકરકુણ્ડલમ્ ॥

વજ્રપાતાઙ્કિતતનું વજ્રપિઙ્ગાક્ષભીષણમ્ ।
સ્વર્ણાબ્જકેસરિપ્રખ્યશિરોરુહવિરાજિતમ્ ॥

નવરત્નાઞ્ચિતસ્વર્ણવિચિત્રવનમાલયા ।
આસિનપાદપાથોજમાપન્નાર્તિનિવારણમ્ ॥

કરુણાવરુણાવાસમરુણારુણમણ્ડલમ્ ।
કિરણારુણિતોપાન્તચરણં નવહારિણમ્ ॥

કારણં સુરકાર્યાણામસુરાણાં નિવારણમ્ ।
ભૂષણં હિ નગેન્દ્રસ્ય માનસાચલપારગમ્ ॥

પુરાણં પ્રણતાશાનાં ચરણાયોધનપ્રિયમ્ ।
સ્મરણાપહૃતાઘૌઘં ભરણાવહિતં સતામ્ ॥

શરણાગતસન્ત્રાણકારણૈકવ્રતક્ષમમ્ ।
ક્ષણાદસુરરાજેન્દ્રતનયપ્રાણહારિણમ્ ॥

પવમાનસુતં વીરં પરીતં પનસાદિભિઃ ॥

ઇત્થ ધ્યાયન્નમન્નેવ ચેતસા સાધકોત્તમઃ ।
સર્વાન્કામાનવાપ્નોતિ નાત્ર કાર્યા વિચારણા ॥

॥ ઇતિ ધ્યાનમ્ ॥

ૐ નમઃ પ્લવગેન્દ્રાય વાયુપુત્રાય વાલિને ।
વાલાગ્નિદગ્ધલઙ્કાય બાલાર્કજ્યોતિષે નમઃ ॥

આઞ્જનેયાય મહતે પ્રભઞ્જનસુતાય તે ।
પ્રમતાદિહૃતે તુભ્યં પ્રમાણાદ્ભુતચેતસે ॥

પ્રાચેતસપ્રણયિને નમસ્તે સુરવૈરિણે ।
વીરાય વીરવન્દ્યાય વીરોન્મત્તાય વિદ્વિષામ્ ॥

વિશાતકાય વેદ્યાય વિશ્વવ્યાપિશરીરિણે ।
વિષ્ણુભક્તાય ભક્તાનામુપકર્ત્રે જિતાત્મને ॥

વનમાલાગ્રવાલાય પવમાનાત્મને નમઃ ।
કૃતમાનાય કૃત્યેષુ વીતરાગાય તે નમઃ ॥

વાલધૃતમહેન્દ્રાય સૂર્યપુત્રહિતૈષિણે ।
બલસૂદનમિત્રાય વરદાય નમો નમઃ ॥

શમાદિગુણનિષ્ઠાય શાન્તાય શમિતારયે ।
શત્રુઘ્નાય નમસ્તુભ્યં શમ્બરારિજિતે નમઃ ॥

જાનકીક્લેશસંહર્ત્રે જનકાનન્દદાયિને ।
લઙ્ઘિતોદધયે તુભ્યં તેજસાં નિધયે નમઃ ॥

નિત્યાય નિત્યાનન્દાય નૈષ્ઠિકબ્રહ્મચારિણે ।
બ્રહ્માણ્ડવ્યાપ્તદેહાય ભવિષ્યદ્બ્રહ્મણે નમઃ ॥

બ્રહ્માસ્ત્રવારકાયસ્તુ સહસદ્બ્રહ્મવેદિને ।
નમો વેદાન્તવિદુષે વેદાધ્યયનશાલિને ॥

નખાયુધાય નાથાય નક્ષત્રાધિપવર્ચસે ।
નમો નાગારિસેવ્યાય નમસ્સુગ્રીવમન્ત્રિણે ॥

દશાસ્યદર્પહન્ત્રેચ છાયાપ્રાણાપહારિણે ।

ગગનત્વરગતયે નમો ગરુડરંહસે ॥

ગુહાનુયાય ગુહ્યાય ગમ્ભીરપતયે નમઃ ।
શત્રુઘ્નાય નમસ્તુભ્યં શરાન્તરવિહારિણે ॥

રાઘવપ્રિયદૂતાય લક્ષ્મણપ્રાણદાયિને ।
લઙ્કિણીસત્વસંહર્ત્રે ચૈત્યપ્રાસાદભઞ્જિને ॥

ભવામ્બુરાશેઃ પારાય પરવિક્રમહારિણે ।
નમો વજ્રશરીયાય વજ્રાશનિનિવારિણે ॥

નમો રુદ્રાવતારાય રૌદ્રાકારાય વૈરિણામ્ ।
કિઙ્કરાન્તકરૂપાય મન્ત્રીપુત્રનિહન્ત્રિણે ॥

મહાબલાય ભીમાય મહતામ્પતયે નમઃ ।
મૈનાકકૃતમાનાય મનોવેગાય માલિને ॥

કદલીવનસંસ્થાય નમસ્સર્વાર્થદાયિને ।
ઐન્દ્રવ્યાકરણજ્ઞાય તત્ત્વજ્ઞાનાર્થવેદિને ॥

કારુણ્યનિધયે તુભ્યં કુમારબ્રહ્મચારિણે ।
નમો ગમ્ભીરશબ્દાય સર્વગ્રહનિવારિણે ॥

સુભગાય સુશાન્તાય સુમુખાય સુવર્ચસે ।
સુદુર્જયાય સૂક્ષ્માય સુમનઃપ્રિયબન્ધવે ॥

સુરારિવર્ગસંહર્ત્રે હર્યૃક્ષાધીશ્વરાય તે ।
ભૂતપ્રેતાદિસંહર્ત્રે ભૂતાવેશકરાય તે ॥

નમો ભૂતનિષેવાય ભૂતાધિપતયે નમઃ ।
નમો ગ્રહસ્વરૂપાય ગ્રહાધિપતયે નમઃ ॥

નમો ગ્રહનિવારાય ઉગ્રાય ચોગ્રવર્ચસે ।
બ્રહ્મતન્ત્રસ્વતન્ત્રાય શમ્ભુતન્ત્રસ્વતન્ત્રિણે ॥

હરિતન્ત્રસ્વતન્ત્રાય તુભ્યં હનુમતે નમઃ ।
અષ્ટોત્તરશતં સઙ્ખ્યા હનુમન્નામમૂર્તયઃ ॥

પુરતઃ પરતો વ્યાપી મમ પાતુ મહાબલઃ ।
શાન્તિરસ્તુ શિવં ચાસ્તુ સત્યાસ્સન્તુ મનોરથાઃ ॥

રક્ષા ભવતુ યોની વા વિવિધે વરદેહિનામ્ ।
અવિઘ્નો દુઃખહાનિશ્ચ વાઞ્છાસિદ્ધિશ્શુભોદયાઃ ।
પ્રજાસિદ્ધિશ્ચ સામર્થ્યં માનોન્નતિરનામયમ્ ॥

ઇતિ શ્રીહનુમદષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded by Gopal Upadhyay gopal.j.upadhyay at gmail.com
Proofread by Gopal Upadhyay, PSA Easwaran

---

*shrIhanumadaShTottarashatanAmastotram 7*
pdf was typeset on August 24, 2024

Please send corrections to *sanskrit@cheerful.com*